TRIVANDRUM SANSKRIT SERIES
No. CXIII.
Śrī Citrodayamañjarī
No. II.

The

# SAṄGĪTAKṚTIS

OF

## Svati Śrī Rāma Varma Mahārāja

EDITED BY
K. SĀMBAŚIVA ŚĀSTRĪ,
*Curator of the Department for the Publication of Oriental Manuscripts, Trivandrum.*

PUBLISHED UNDER THE AUTHORITY OF THE GOVERNMENT OF HIS HIGHNESS THE MAHARAJA OF TRAVANCORE.

TRIVANDRUM:
PRINTED BY THE SUPERINTENDENT, GOVERNMENT PRESS,
1932.

*All Rights Reserved.*]

अनन्तशयनसंस्कृतग्रन्थावलिः ।

ग्रन्थाङ्कः ११३.

श्रीचित्रोदयमञ्जरी

ग्रन्थाङ्कः २.

4055

महोन्नतमहामहिमश्री
स्वातिश्रीरामवर्ममहाराजप्रणीताः

# सङ्गीतकृतयः

पौरस्त्यग्रन्थप्रकाशनकार्याध्यक्षेण
के. साम्बशिवशास्त्रिणा
संशोधिताः ।

ताश्च
अनन्तशयने
महामहिमश्रीचित्रावतारमहाराजशासनेन
राजकीयमुद्रणयन्त्रालये तदध्यक्षेण
मुद्रयित्वा प्रकाशिताः ।

कोलम्बाब्दाः ११०७, क्रैस्ताब्दाः १९३२

॥ श्रीः ॥

श्रीमूलावनिपालमौलिमणिना सङ्कल्पितश्रीरिव
श्रीमूलात्मजनिस्तथा सहजया लक्ष्म्या च सम्भावितः ।
स्वातिज्योतिरिवादितः समुदितश्चित्रावतारः स्वयं
मार्ताण्डाग्रसरो विराजति महाराजः स रामाभिधः ॥

भास्वद्वर्णमणिः प्रवालमृदुला श्रुत्याद्यलङ्कारिणी
श्रीमद्वञ्चिवसुन्धरानवयशोराशिप्रकाशात्मिका ।
उत्फुल्लत्सुकृतिप्रसाधनधृतामोदोन्नदड्डिण्डिमा
श्राचित्रोदयमञ्जरी सुमनसां सर्वस्वमुज्जृम्भताम् ॥

के. साम्बशिवशास्त्री.

# PREFACE.

These are the famous musical compositions of Svāti Tirunal, whose fragrance has perfumed not only the whole of Travancore, but has spread through the length and breath of enlightened India. These compositions embellished by the power of unrivalled erudition are the treasure-house of sweet sense married to sweeter sound. And these are the compositions which have infused life into the world of Belles-lettres where Poetry has been sweetened by the communion with music. And with these creations that are replete with the essence of aesthetic emotions and transcend the range of Nature's laws, the poet charms and enraptures the world, immersing it in the ecstasy of exclusive bliss and thus effacing the bounds between the Self and the beyond. Even God Śrī Padmanābha seems to have offered himself to his devotee, the poet, fettered as He is by the panegyrics of His numerous virtues and enshrined in the chastening echoes of his inspired genius. These compositions of His Most Gracious Highness Svāti Tirunal Rama Varma Maharaja, which are the embodiment of the bliss of self-realisation have appeared not only in Sanskrit and Malayalam, but in various other languages as well. Of these, those composed in Sanskrit and Malayalam have been published by M. R. Ry., K. Chidambara Vādhyār Avl., B. A., but are not useful to the non-Malayalam-knowing public, as they are in Malayalam characters. There is many a Western and Eastern scholar thirsting like Cātaka birds, for the enjoyment of these ambrosial pieces. And our desire to bring out those musical pieces composed in Sanskrit as a separate publication in Nagari characters has now come to fruition by virtue of a Government order to that effect and we place this edition before the enlightened public.

The biographical sketch of the author famous as the claimant to pre-natal sovereignty, already embodied in the introduction to Upākhyānadvaya is reproduced here.

It is evident from the last stanza,

"स्वातीजातेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मी-
राज्ञीपुत्रेण वञ्चीश्वरकुलजनुषा रामवर्माभिधेन ।
भक्त्युद्रेकेण शश्वद् गुरुवरकृपया निर्मितं चम्पुकाव्यं
स्यानन्दूरेश्वरस्य प्रमितमुपहृतं शं सदालं विदध्यात् ॥"

of the Syānandūrapuravarṇanaprabandha that the poet was the king of Travancore, son of Rani Lakṣmi Bai, and born under the asterism of Svāti. And by the juxtaposition and sequential suggestiveness of the attributive phrases,

"चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मीराज्ञीपुत्रेण"

which indicate according to the maxim "सर्वं वाक्यं सावधारणम्" that "लक्ष्मीराज्ञीपुत्रत्वम्" was subsequent to his being 'चूडाधृतसरसिजनाभाङ्घ्रियुग्म', it is clear that the king was the claimant to prenatal sovereignty. According to the explanation of the commentator of the treatise "शं सदालं निदध्यात्" indicates through Mudrālaṅkāra the date of completion of the work in the Kali era (1803875 days from the beginning of that era) and the date of the author is thus the first part of the 19th century. Historically this king was the son of Rani Lakṣmi Bai and was born in the month of Meṣa in the year 1813 and demised in his 34th year. His father was Raja Raja Varma of the Parpa dynasty (Changanacherry) and his mother died in his second year and his maternal aunt 'Śrī Pārvati Bai' was the regent during his minority. Just as the crescent moon gathers effulgence through the acquisition of fresh digits, he grew up gathering brilliance through his proficiency in all fine arts. His genius and innate aptitude for music and literature, ripened by his education, easily raised him to the position of a great scholar and poet. This poet was in fact a second Creator. He had a rare and perfect mastery over various languages such as Malayalam, Sanskrit, English, Mahratti, Telugu, Kanarese, Tamil and Urdu. His tutor in English and Politics was Mr. Subba Rao, his future Dewan. And it is most astonishing that the knowledge of the science of politics, proficient in tactics and embellished by exceeding courage, valour and heroism emblazed a heart that was imbued with the sweetest poetical fervour. Such great qualities as serenity, magnanimity, compassion, impartiality and imperiousness, illumined his illustrious reign. During the very short period of his life, in the midst of the manifold demands of his kingly office, he attained a unique celebrity as a great man of letters. And his works are:—

1. Śrī Padmanābha Śataka.
2. Syānandūrapuravarṇanaprabandha.
3. Ajāmilopākhyāna



4. Kucelopākhyāna.
5. Saṅgītakṛtis (in Sanskrit and Telugu).
6. Utsavavarṇanaprabandha.
7. Yayāticarita.
8. Bhaktimañjari.

This great and magnanimous king, this great poet has been thus described by me in my Citrābhyudayakāvya.

"पचेलिमैः फलैर्धर्मो भूयः शाखोपशाखया ।
स्वातिक्रममुदाहर्तुं स्वातिक्रममथावहत् ॥

इह कोऽपि महाराजपदवीं स्पृहयन् पुरा ।
स्वातिभावनया सिद्धः स्वातिभूप इति श्रुतिः ॥

बाल एव हि यः प्राप्य लीलया सकलाः कलाः ।
सम्पूर्णमण्डलो राजा गर्भश्रीमानिति श्रुतः ॥

आङ्गलश्रीरिहोत्तुङ्गमङ्गलोपघ्नमञ्जुला ।
विद्यामन्दिरमावास्य यदुपक्रममेधिता ॥

सङ्गीत्यापि च साहित्या स्वयंवृतमहात्मना ।
सारस्वतोऽयं संसारः ससारस्तेन साधितः ॥

पुरा भावनयेवासौ रम्याद्यै रसभावकैः ।
अन्वभूत् परमाह्लादं ब्रह्मास्वादसहोदरम् ॥

आमोदिनी फलवती निखिलास्वादकारिणी ।
श्रीपद्मनाभपादाब्जे यदीया भक्तिमञ्जरी ॥

राज्यभारेऽपि महति कूटयन्त्रानियन्त्रिते ।
स्वतन्त्रः काव्यसाम्राज्यमभूत स्वातिराडयम् ॥"

(Sarga-1. Sloka-35—42.)

When we consider the date of composition of these songs and other treatises and the very early age of the poet, it is possible to imagine him to have been the re-incarnation of some great Yogi who through some casual swerving from his asceticism happened to be born again for the fulfilment of his life; and hence the glory of his achievements during such a limited span of life as vouchsafed to him. He was born on the fifth day of the bright fortnight in the month of Meṣa in 1812 A. D. He began to study English, Urdu, Telugu, Kanarese and Mahratti in his 7th year. In his 13th year in 1825 Colonel Welsh after meeting His Highness expressed his sincere satisfaction and congratulated His Highness, speaking highly of the royal house and of His Highness's privilege of being the ruler of this most beautiful

Indian State. In his 16th year, in the full flush of his youth, he ascended the throne of this prosperous land. By the devotion to Śrī Padmanābha which blessed him with prosperity and by his literary activities that were redolent of the nectarine sweetness of music, he contrived to soften the rigours of regal responsibility. His Highness did not enjoy the exclusive pleasures of selfish luxury, but invited celebrated scholars and poets and musicians from various countries, honoured them duly and shared their joy. His works do not solely comprise sweet and relishable musical compositions but embrace a wider range. For, prompted by such great musicians as Ponniah, Vadivelu and Pazhaniyandi, he composed songs to be sung in dramas on appropriate occasions and those such as "पन्नगेन्द्रशयन" are famous even now, composed in "रागमाला". This work could be classified under three heads namely Kīrtanas, Varnas and Padas. Of these, Kīrtanas are those that are sung in praise of God, particularly his own dynastic deity Śrī Padmanābha and those are—

१ नवरात्रिकीर्तनानि ३. मध्यमकालकीर्तनानि

२. घनरागकीर्तनानि ४. नवरत्नमालिकाकीर्तनानि

and these could again be subdivided.

*Varṇas.* According to the explanation of Bṛhaddeśi,

"ननु वर्णशब्देन किमुच्यते? वर्णशब्देन गानमभिधीयते"

those Svaras are Varṇas that occur in a song such as the constant, the variable, the ascending and the descending. And the composition of such songs in consonance with the appropriate sense could only be achieved by unique mastery over literary art combined with sound knowledge of the vitals of the science of music.

*Padas.* These are songs composed in conformity with the canons of dramaturgy and of utility in histrionic art. These are appropriately called Padas as they could be sung in unison with the timings and other appertainances of the temple dance of nautch girls and were then made use of even in foreign countries and held in high esteem.

And these Kīrtnanas, Varṇas and Padas composed in appropriate melodies could be seen in the index itself and so are not elaborated upon.

Thyāgarāja and Jayadeva have impressed the insignia of their names on all their songs, but our own poet, the devotee of Śrī Padmanābha has only impressed the insignia of



his dynastic deity on his songs, endowed with abundant modesty as hē was. But those few songs that are devoid of this symbol such as:—

"देवि जगज्जननि!" (Gāna-4)

"पाहि मां श्रीवागीश्वरि!" (Gāna-5)

"पाहि तरक्षुपुरालय!" (Gāna-127)

are supposed to have been composed by his court-musicians and have been included in the compilation of his own songs on account of their artistic excellence. This is but in keeping with the magnanimous spirit of His Highness.

Though this work is undertaken on the basis of that in malayalam characters, many readings in it are observed to be incorrect by a comparison with other manuscripts and by the consideration of appropriateness. And when the necessary corrections have been made, the present publication is strictly speaking a new one in every respect. A few such corrections are noted below:—

| Page- | Gāna- | Malayalam edition | Present edition |
|---|---|---|---|
| 4- | 4- | गुरुकरुणामयि- | कुरु करुणामयि- |
| 5- | 6- | देवि! सदा कुशलम्- | देहि सदा कुशलम्- |
| 6 | 6- | द्रुतमलं कुरु- | धूतमलं कुरु- |
| 62- | 80- | तापानिधिनिवहहरण!- | आपन्नाधिनिवहहरण! |
| 90- | 117- | प्रह्लादवदनोपात्तप्रति-भयनृहरे! | प्रह्लादावनोपात्तप्रतिभय-नृहरिरूप! |
| 91- | 118- | बाहुपरिकलितपरशु-कूर!- | बाहुपरिकलितपरशु-कुरङ्ग! |
| 101- | 129- | करुणारसराजतपङ्क-भूतचरित! | करुणारसराजदपाङ्ग पूतचरित! |

Six other works, belonging to Dr. Rohiṇi Raja, Maṇṇoor Maṭom Palace, Mavelikkara, have been utilised in the publication of this edition. These are of various descriptions consisting of printed books, transcripts, and palm-leaf manuscripts. These have been of immense service to us and we take this opportunity to express our deep-felt indebtedness to him for lacing them at our disposal.

Trivandrum
15-12-1107.

K. SĀMBAŚIVA ŚĀSTRI.

# अवतारिका ।

ता इमाः सङ्गीतकृतयः — याभिरिदमखण्डमस्मद्धिराज्यं न केवलम्, अपितु सकलमेव सहृदयसाम्राज्यभासुरं भारतखण्डमधिवासितम् । यासां चानितरप्राप्यव्युत्पत्तिबलपरिष्कृतानां मधुरतरशब्दार्थनिगुम्फननिलयानामाविर्भावेन सङ्गीतसाहितीसमाश्लेषसरसः सारस्वतः संसारः ससारतामनायि । याः किल नवरसरुचिरा नियतिकृतनियमरहिता निर्मितीरादधत् कविराह्लादैकरसानुलिप्तं जगदात्मपरविभागशून्यमाकलयंश्चमत्करोति । यास्विव प्रसितो निजापदानगुणगणनिगलितः श्रीपद्मनाभो दासाय कवये समुदितप्रतिभापरिस्पन्दनस्य प्रतिध्वनिमनुरणयंस्तिष्ठते । महोन्नतमहामहिमश्रीस्वातीनक्षत्रजातश्रीरामवर्ममहाराजानामात्मानन्दरसपेशिकास्ता एताः कृतयो न केवलं गैर्वाण्यां, नापिच कैरल्याम्, अपितु विविधासु भाषासु कृतावताराः । तासु गैर्वाण्यां कैरल्यां च कृताकृतयः केरळलिप्या श्रीमद्भिः के. चिदम्बरवाध्यार् बि. ए. बिरुदशालिभिः प्रसाधितास्तदनभिज्ञानां सहृदयानां नोपकाराय पर्याप्ताः । बहवः खलु ते प्राच्याः प्रतीच्याश्च चातका इव तृषिताः समुत्कण्ठन्ते तत्सुधास्वादलोलुपाः । अतो गैर्वाण्यां गुम्फिता गीतीः पृथक्कृत्य देवनागरलिप्यां प्रकाशयितुमनसामस्माकं प्रयत्नः साधु सम्मतो राजकीयाधिकारस्य फलात्मना परिणतः सद्यः सतां समक्षमवतरति ।

आसां सङ्गीतकृतीनां कर्ता गर्भश्रीमानिति सुप्रसिद्धो महोन्नतमहामहिमशाली स्वातिश्रीरामवर्ममहाराजः कदा स्वकीयेनावतारेण भुवमभूषयदित्यादि जीवितचरितमदसीयोपाख्यानद्वयस्योपोद्धाते समुट्टङ्कितमिह प्रतिरूप्यते —

कविरयं स्वकृतेः स्यानन्दूरपुरवर्णनचम्पूप्रबन्धस्यान्तिमेन —

"स्वातीजातेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मी-
राज्ञीपुत्रेण वञ्चीश्वरकुलजनुषा रामवर्माभिधेन ।
भक्त्युद्रेकेण शश्वद् गुरुवरकृपया निर्मितं चम्पुकाव्यं
स्यानन्दूरेश्वरस्य प्रमितमुपहृतं शं सदालं निदध्यात् ॥"

इति पद्येन स्वातीनक्षत्रजातः लक्ष्मीराज्ञ्याः पुत्रो रामवर्माभिधः श्रीवञ्चिमहाराज इति सिध्यति । अपिच चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन लक्ष्मीराज्ञीपुत्रेणेति विशेषणाभ्यामन्योन्यालिङ्गितार्थप्रतिपादनदिशा घटनापौर्वापर्येण च 'सर्वं वाक्यं सावधारणमि'ति न्यायेन चूडाधृतसरसिजनाभाङ्घ्रियुग्मेन सतैव लक्ष्मीराज्ञीपुत्रत्वे प्रवेश इति सूचयद्भ्यां गर्भश्रीमानयं महाराज इत्यपि सिद्धम् । "शं सदालं निदध्याद् इत्यनेन कलिदिनारम्भात् प्रभृति त्रिसहस्राष्टशतपञ्चसप्तत्यधिकाष्टादशलक्ष(१८०३८७५)दिवसेषु गतेष्वेतत्प्रबन्धसमाप्तिरिति सूचनाद् मुद्रालङ्कार" इति तत्पद्यव्याख्यातृरीत्या क्रिस्तीयैकोनविंशशताब्द्याः पूर्वभागोऽस्य कवेर्जीवितसमय इति लभ्यते । निष्कृष्य चरित्रदिशा १८१३–तमसंवत्सरे मेषमासि लक्ष्मीदेव्यां लब्धावतारोऽयं चतुस्त्रिंशे वयसि स्वर्गमारुरोहेति प्रसिद्धिः । गर्भ एवात्मसमर्पणादिव वत्सरे द्वितीये लक्ष्मीदेव्या मात्रा वियुक्तस्यास्य, पर्वराजवंश्यः श्रीराजराजवर्मदेवः पिता, प्रतिनिधीभूय राज्यं शासती श्रीपार्वतीराज्ञी मातृष्वसा च पोषकौ बभूवतुः । क्रमशः सर्वासु कलासु क्रममाणोऽयं बालचन्द्र इव नचिरात् सम्पूर्णमण्डलो ददृशे । सङ्गीतसाहित्ययोराजानसिद्धा प्रतिभामुमनायासेन विद्याभ्यासेन समुत्तेजनक्षमेण कमपि महान्तं पण्डितं कविं च चक्रे । कैरळी गैर्वाणी आङ्गली माहाराष्ट्री आन्ध्री कार्णाटी द्राविडी हिन्दुस्थानी इत्याभिरनेकाभिर्भारतीभिरनितरसुलभाभिः स्वयंवृतोऽयं कश्चिदपर एव कविर्ब्रह्माभवत् । किमधिकेन, अमात्यभावी श्रीसुब्बरायोऽस्य आङ्गलविद्यायामनुरूपेषु राज्यतन्त्रकलाकौशलेषु चाचार्योऽभवत् । आश्चर्यमिदमेव तत्र महाराजे काममतिभूमिमगमत् । यत् क्वचन काव्यालापसरससरसेऽपि मानसपञ्जरे कूटप्रयोगकुशलं राज्यतन्त्रविज्ञानमतिवीर्यशौर्यपराक्रमोपस्कृतमैकाधिकरण्येन प्रविवेश । गाम्भीर्यौदार्यदयादाक्षिण्यैकशासनत्वादयो महागुणा अस्य भरणाभरणतां प्रतिपद्य निकामं शुशुभिरे । अतिह्रसीयस्यपि जीवितसमये महति महत्यपि राज्यकार्यवैधुर्ये जाग्रति सरससाहितीकारख्यातेरप्ययमसामान्यं भाजनमासीत् । कृतयश्चास्य —

१. श्रीपद्मनाभशतकम् ।

२. स्यानन्दूरपुरवर्णनप्रबन्धः ।

३. अजामिलोपाख्यानम् ।

४. कुचेलोपाख्यानम् ।



4055

५. सङ्गीतकीर्तनानि (संस्कृत-आन्ध्रयादिभाषासु च) ।

६. उत्सववर्णनप्रबन्धः (संस्कृतकेरलोभयभाषारूपः) ।

७. ययातिचरितम् ।

८. भक्तिमञ्जरी ।

इत्येताः ।

एवमेते महानुभावा महाकवयो महाराजाः श्रीचित्राभ्युदयकाव्येऽस्माभिरुपश्लोकिताः—

"पचेलिमैः फलैर्धर्मो भूयः शाखोपशाखया ।
स्वातिक्रममुदाहर्तुं स्वातिक्रममथावहत् ॥ ३५ ॥

इह कोऽपि महाराजपदवीं स्पृहयन् पुरा ।
स्वातिभावनयां सिद्धः स्वातिभूत इति श्रुतिः ॥ ३६ ॥

बाल एव हि यः प्राप्य लीलया सकलाः कलाः ।
सम्पूर्णमण्डलो राजा गर्भश्रीमानिति श्रुतः ॥ ३७ ॥

आङ्गलश्रीरिहोत्तुङ्गमङ्गलोपघ्नमञ्जुला ।
विद्यामन्दिरमावास्य यदुपक्रममेधिता ॥ ३८ ॥

सङ्गीत्यापि च साहित्या स्वयंवृतमहात्मना ।
सारस्वतोऽयं संसारः ससारस्तेन साधितः ॥ ३९ ॥

पुरा भावनयेवासौ रव्याद्यै रसभावकैः ।
अन्वभूत् परमाह्लादं ब्रह्मास्वादसहोदरम् ॥ ४० ॥

आमोदिनी फलवती निखिलास्वादकारिणी ।
श्रीपद्मनाभपादाब्जे यदीया भक्तिमञ्जरी ॥ ४१ ॥

राज्यभारेऽपि महति कूटयन्त्रनियन्त्रिते ।
स्वतन्त्रः काव्यसाम्राज्यमभूत स्वातिराडयम् ॥ ४२ ॥"

(सर्गः १)

प्रस्तुतानां सङ्गीतकृतीनामन्येषां चोपाख्यानादीनां विनिर्मितिवत्सरे पार्यन्तिके च परिमिततमे वयसि पर्यालोच्यमाने निकाममस्य महाकवेर्जीवित-

चर्या पुराजनुषि योगभ्रष्टस्येव कस्यचन तत्तादृगपदानसम्पदनुभवमात्रावशेषा पर्यणंस्तेति शक्यमभ्यूहितुम् । तथाहि — १८१३तमे क्रिस्त्वब्दे मेषमासि शुक्लपञ्चम्यां लब्धावतारोऽयं सप्तमे वयसि आङ्गलीं, हिन्दुस्थानीं, तैलङ्गवीं, कार्णाटीं, माहाराष्ट्रीं च भाषां परिशीलयितुं कृतारम्भ आसीत् । १८२६तमे संवत्सरे त्रयोदशे वयसि श्रीमान् कणल् वेल्षनामा प्रभुरिमं संपश्यन् अत्यन्तं संतृप्तमनास्तादात्विकीं राजकुटुम्बस्थितिं राजकुमारस्य भारतखण्डान्तर्गतरमणीयतमश्रीवञ्चिभूमिनाथत्वं च परस्परबन्धपर्याप्तं मन्यमानः सुतरामभिननन्द । सोऽयं प्रतिनवशुभोदयशंसिनि भूमण्डले नवयौवनारम्भरमणीये षोडशे वयसि राज्यलक्ष्म्याः करं जग्राह । परुषतरपृथ्वीभरणक्लेशशर्करिलं मानसमतिललितलक्ष्मीकटाक्षनिक्षेपायितया श्रीपद्मनाभभक्तिमञ्जर्या, मधुमधुरसङ्गीतसुगन्धिना साहित्यरसनिःष्यन्देन च मृदूकृत्य सुखसञ्चारसुन्दरमतानीत् । न केवलमात्मारामः सुखमनन्यवेद्यमन्वभूदेष महाराजः, किन्तु तत्तद्देशीयान् पण्डितान् कवीन् गायकांश्च तत्तान् सुप्रसिद्धानानाय्य यथोचितं बहुमान्य च स्वकीयमानन्दातिशयमपरवेद्यमप्यकरोत् । नच केवलमनुभवरसानुलिप्तैरर्थानुध्यानपरिस्पन्दनैरस्य कृतयो नासङ्गीतगन्धयः परन्तु सन्दर्भेषु नाट्यकलानुसम्पुटिता अपि । वटिवेलु, पोन्नय्य, पळनियाण्डिप्रभृतिभिर्गायनप्रकाण्डैरुपचोदितोऽयं नाट्यपाठ्यानि पदानि प्रबबन्ध । तानि चाधुनापि प्रथन्ते "पन्नगेन्द्रशयना"-दीनि, यानि रागमालयानुकलितानि ।

सङ्गीतकृतयोऽस्मिन् ग्रन्थे कीर्तन-वर्ण-पदात्मना त्रेधा विभागमर्हन्ति । तत्र कीर्तनानीश्वरस्तोत्रात्मकानि प्रायः स्वकुलदैवतश्रीपद्मनाभपराणि । तानि च —

| | | | |
|---|---|---|---|
| (१) | नवरात्रकीर्तनानि । | (३) | मध्यमकालकीर्तनानि । |
| (२) | घनरागकीर्तनानि । | (४) | नवरत्नमालिकाकीर्तनानि । |

इति च भूयोऽवान्तरविभागयोग्यानि ।

वर्णाः — "ननु वर्णशब्देन किमुच्यते ? वर्णशब्देन गानमभिधीयते" इति बृहद्देशीवचनात् स्थायिनः, सञ्चारिणः, आरोहिणः, अवरोहिणश्च गानघटिताः स्वरा वर्णाः कथ्यन्ते । अर्थानुगुणतया तादृशं गानगमनमसाधारणेन साहित्यवैदुष्येण सङ्गीतशास्त्रमर्मज्ञतया च परं साध्यम् ।



पदानि — नाट्याभिनयोपयोगीनि भरतशास्त्रसिद्धान्तानुसारीणि गीतानि । ताळमेळसङ्कलनस्थानोचितानीमानि मन्ये साम्प्रतं पदान्येव । क्षेत्रेषु देवदासीलास्यार्थं तदात्वे सप्रयोजनान्यमूनि देशान्तरीयैरपि बाढमादृतानि ।

एतानि कीर्तन-वर्ण-पदानि तत्तदुचितरागरञ्जितानि यथाक्रममनुक्रमणिकादिशेत एव ग्राह्याणि न वितायन्ते ।

त्यागराजजयदेवाविव नाममुद्राङ्किता एव गीती रचितवानप्ययं श्रीपद्मनाभदासः कविरात्मनामग्रहणमकुर्वाणः सर्वतः कुलदैवतस्य श्रीपद्मनाभस्यैव नाममुद्रया विशिष्यते विनयाधिकः । यद्यप्यत्यल्पे कतिचन गीतविशेषाः पद्मनाभमुद्रादरिद्राः —

| | |
|---|---|
| "देवि ! जगज्जननि !" | (गानं ४) |
| "पाहि मां श्रीवागीश्वरि !" | (गानं ५) |
| "पाहि तरक्षुपुरालय !" | (गानं १२७) |

इत्यादयस्तेषामेवमुपपत्तिमूहन्तेऽभिवृद्धा आस्थानगायकाः, यद् महाराजोपजीविभिः सरसैरन्यै रचितानां गुणविशेषादात्मीयकोटौ प्रवेशोऽनुमत इति । साम्प्रतमिदं निर्मत्सरे महाराजे सम्भवदुक्तिकं भाति ।

केरळलिप्यां मुद्रितं पुस्तकमाश्रित्य निर्वृत्तेऽप्यस्य प्रसाधने तत्रत्यपाठेषु समनन्तरसम्पादितमातृकान्तरदिशा वस्तुगत्या च नैकेऽवश्यशोधनीया दृष्टाः । तान् यथावदुपशोध्य प्रसाधितोऽयं प्रायेणाभिनवायितः कश्चिदन्य एव ग्रन्थः सम्प्रतिपन्नः ।

उदाहरणार्थं काचिदियं दिक् प्रदर्श्यते —

| पृष्ठं. | गानं. | मुद्रितपाठः. | शोधितपाठः. |
|---|---|---|---|
| ४ | ४ | गुरु करुणामयि | कुरु करुणामयि |
| ५ | ६ | देवि ! सदा कुशलं | देहि सदा कुशलम् |
| ६ | ६ | द्रुतमलं कुरु | धूतमलं कुरु |
| ६२ | ८० | तापनिधिनिवहहरण ! | आपन्नाधिनिवहहरण ! |
| ९० | ११७ | प्रह्लादवदनोपात्तप्रति-भयनृहरे ! | प्रह्लादावनोपात्तप्रति-भयनृहरिरूप ! |

| | | | |
|---|---|---|---|
| ९१ | ११८ | बाहुपंरिकलितपरशु-क्रूर ! | बाहुपरिकलितपरशु-कुरङ्ग ! |
| १०१ | १२९ | करुणारसराजतपङ्क-भूतचरित ! | करुणारसराजदपाङ्ग ! पूतचरित |

एतत्प्रसाधनकृते कृतावलम्बा अपराः षण् मातृकाः मावेलिक्कर मण्णूरमठं राजमन्दिरात् रोहिणितिरुनाळ्महाशयेन प्रेषिताः । मुद्रितप्रतिरूपितभेदेन पत्राकृतिभिरप्याभिः प्रस्तुतसङ्गीतकृतिप्रसाधनाय सुबहूपकृतमिति दयावतस्तत्स्वामिनः साहायकमनितरसाधारणमनुस्मरन्नेष सहृदयसमक्षमिमाः सङ्गीतकृतीरवतारयामि ।

अनन्तशयनम्,
१५-१२-१०७.

के. साम्बशिवशास्त्री.

---

## विषयानुक्रमणिका ।


| विषयः. | पृष्ठम्. |
|---|---|
| **१. कीर्तनानि.** | |
| मङ्गलम् | १ |
| गणपतिकीर्तनम् | २ |
| नवरात्रकीर्तनानि | ३—१२ |
| विष्णुकीर्तनानि — | १३—८८ |
| (क) विष्णुसामान्यकीर्तनानि | १३—४८ |
| (ख) श्रीपद्मनाभकीर्तनानि | ४८—६४ |
| (ग) श्रीनृसिंहकीर्तनानि | ६४, ६५ |
| (घ) श्रीकृष्णकीर्तनानि | ६५—७६ |
| (ङ) श्रीरामकीर्तनानि | ७६—८८ |
| आञ्जनेयकीर्तनम् | ८८ |
| दशावतारकीर्तनम् | ८९, ९० |
| शिवकीर्तनानि | ९०—१०१ |
| सुब्रह्मण्यकीर्तनम् | १०१ |
| देवीकीर्तनानि | १०१—१०३ |
| वैराग्यकीर्तनानि | १०३—१०८ |
| नवरत्नमालिकाकीर्तनानि | १०८—११३ |
| **२. वर्णाः.** | ११३—१३५ |
| **३. पदानि.** | १३५—१४२ |
| **४. मङ्गलम्.** | १४२, १४३ |

॥ श्रीः ॥

महोन्नतमहामहिमश्री

स्वातिश्रीरामवर्मवञ्चिमहाराजप्रणीताः

# सङ्गीतकृतयः ।

## १. कीर्तनानि ।

### (१. मङ्गळम् ।)

गानं—१. नाटरागः. झम्पताळः.

(१) जय देवकीकिशोर! जय कोटिस्मराकार!
जय कालिन्दीतटविहार! जय गोपिकाजार! जय जय.

(२) जय मुरळीगानलोल! जय सुवर्णरुचिचेल!
जय सलीलधृतशैल! जय वारिदनील! जय जय.

(३) जय चरित्रधुतपाप! जय खण्डितासुराटोप!
जय यादवकुलदीप! जय गोपालरूप! जय जय.

(४) जय कुटिलासितकेश! जय मुनिमानसनिवेश!
जय पङ्कजनाभाधीश! जय भूमीरमेश! जय जय.

गानं—२. पन्तुवराळी. आदिताळः.

(१) मातङ्गतनयायै मङ्गळम्.
भूयो मनसिजारिकान्तायै मङ्गळम्.

१. 'चा' ग. पाठः.

G. P. T. 2011. 500. 22-8-1106. B

(२) वहळकुङ्कुमपङ्कपाटलितकुचायै
महिषासुरहारिण्यै मङ्गळम्.

(३) करिराजगमनायै वरतापससञ्चय-
स्मरणीयचरणायै मङ्गळम्.

(४) *वरनदीतटगायै वनजनाभानुजायै
मरतकमेचकाङ्ग्यै मङ्गळम्.

---

## (२. गणपतिकीर्तनम् ।)

गानं—३. सावेरी. आदिताळः.

पल्लवी. परिपाहि गणाधिप ! भासुरमूर्ते !

अनुपल्लवी. शरणागतभरण ! सामजोपमसुन्दरास्य ! परि

चरणम्. (१) हिमकिरणशकलशेखरतनुभव !
शमलनिवहशमन !
कमलजमुखसुरवृन्दनुतचरित !
कामितपूरकपादसरोरुह ! परि

(२) मस्तकविगळितदानजलमिळित-
मधुकरसमुदाय !
हस्तलसितनिजदन्त ! महितसुगु-
णाखुवाह ! गुहसोदर ! निरुपम ! परि

(३) पावनपङ्कजनाभमनोहर-
भागिनेय ! देव !
सेवकजनततिविद्यासमधिक-
श्रीसुखदायक ! भूरिकृपाकर ! परि

---

१. 'न्यै मातङ्गतनयायै म' ग. पाठः. २. 'चेम्पट.' क. पाठः.

* वंश्चिराज्यान्तर्गतः 'आर्त्तिङ्ङल्' इति प्रसिद्धो देशविशेषः सम्भाव्यते ।



## (३. *नवरात्रकीर्त्तनानि ।)

### प्रथमम् ।

गानं—४. शङ्कराभरणम्. चेम्पट.

प. देवि ! जगज्जननि ! देहि कृपया मम
तावकचरणभक्तिम् ।

अ. देवमकुटमणिदेदीप्यमानपादे !
केवलानन्दपूर्णे ! कीरसुवाणि ! वाणि ! देवि !

च. (१) वीणापुस्तकरञ्जितकरतलविहसितकञ्जवरेऽम्बिके !
वेणीमञ्जिमपुञ्जविनिर्जितविततघनाघनमालिके !
एणीमदविनिवारणनिपुणतरेक्षणहृतनतपातके !
शाणोल्लीढमहामणिभूषणशालिनि ! बुधजनपालिके !
प्रीणितमुनिगेये ! द्रुहिणजाये !
परममेये ! निरपाये ! देवि !

(२) सकलकलालयशारदहिमकरसदृशविलासयुतानने !
मकरवराङ्कशरासनमौर्वीमहिततराळकमोहने !
शुकसनकादिमुनीश्वरविरचितसुन्दरपदयुगपूजने !
विकटजटालसितेन्दुकलापिनि ! विमलसरोजवरासने !
विकचकमलपादे ! विहतभेदे !
निहतखेदे ! भृतमोदे ! देवि !

(३) ज्योतिर्मयनवहारायितसज्ज्योतिषतन्त्रविभूषिते !
मातर्मेदुरमीमांसागममांसलितोरुयुगाञ्चिते !
चेतोहरतरशब्दागमकाञ्चीलतिकागुणशोभिते !
पातकहरपाञ्चादिपुराणपादितपाणिविराजिते !
वीतशमलहृद्ये ! कलितविद्ये !
त्रिजगदाद्ये ! निरवद्ये ! देवि !

---

१. 'आदितालः' क. ख. पाठः. २. 'राजित' मुद्रितपाठः. ३. 'लि' क. ख. पाठः. ४. 'ग' मुद्रितपाठः. ५. 'विगत' क. ख. पाठः. ६. 'त्रि' मुद्रितपाठः.

* इह महाराजमन्दिरे नवरात्रमहोत्सवे एकैकस्यां रात्रौ इदमिदं गेयमित्यास्ति सम्प्रदायः । तदनुक्रमेण इतो नवकीर्त्तनानि योजितानि ॥

च. (४) अरुणतराधरपरिलसदतिमृदुहसितद्युतिपटलोज्ज्वले !
शरणसमागतजनपरिपालनसततोद्यतकरुणाकुले !
परिजनविरचितनवरात्रोत्सवपरितोषितहृदयेऽमले !
कुरु करुणामयि भजनपरे मयि कुन्दमुकुळरदनेऽतुले !
भूरिशुभकराणि अघहराणि
नुतिवराणि करवाणि देवि !

---

द्वितीयम् ।

गानं—५. कल्याणी. आदितालः.

प. पाहि मां श्रीवागीश्वरि ! पाहि भुवनेश्वरि !

अ. देहि तावकदयांमयि भारति !
देहिबोधसुखदायिकामिह
मोहभारतिमिरसञ्चयामृत-
मूर्त्तिममलबुधलोकविलसित-
मोहनीयकटकाङ्गदभूषितमु-
ग्धगात्रि ! तुहिनांशुवतंसिनि !
बाहुलालसितपुस्तकजपवट-
बन्धुराभयवरे ! परचिन्मयि ! पाहि

च. (१) शारदे ! कचपाशविडम्बितरुचिरतरासितनीरदे !
निजपतिकमलजनिरुपमतरसुखकरणविशारदे !
स्फुटतरधवलिमविलसितमुकुरशकलपटलीरदे ! विनुत-
[नारदे ! (?)
दारुणाधिकरपातकावलीदारणैकनिरते ! सुभाषिणि !
सारसगर्भदळायतलोचनपूरितभक्तमनोरथवल्लरि !
वारणकुम्भमदापहकुचयुग-
भारविनम्रकृशोदरि ! मामक-
करपदमुखसमकरणनिकरमपि
चरणयुगभजनपरमिह कुरु तव पाहि

१. 'सितानि' क. पाठः. २. 'यां' मुद्रितपाठः.



च. (२) श्यामळे ! बहलागरुचन्दनमृगमदघुसृणपरीमळे !
परिहृतपदनतपरिजनसमुदयनिखिलमनोमले !
शतमखमुखसुरवरपरिणुतबहुविधचरितेऽमले ! मधुरकोमळे !
सामजाधिपमराळिकागतिचारुमन्दगमने ! सुहासिनि !
मामकमानसतापसमूहविराममतीव विधातुमये पद-
तामरसद्वयमनुकलये हृदि
तामसदोषविलासनिरासिनि !
समुदयदविकलहिमकररुचिमद-
शमनकरणपटुविमलहसितमुखि ! पाहि

(३) भासिते ! शुकशौनककौशिकमुखमुनिपरिषदुपासिते !
सहृदयरसकरकविवरनिकरहृदयकमलासिते !
श्रुतियुगपथपथिकनयनपरिलसदरुणसितासिते !
कुसुमवासिते !
भासमाननवरात्रिकोत्सवभावुकापचितिमोदशालिनि !
भासुरसारसनाञ्चितरत्नविलासविशेषविनिर्जितशक्रश-
रासरुचे ! सकलागमरूपिणि !
दासमिमं कृपया शिशिरीकुरु
वस मम सुखमधिरसनमनवरतम्
असदृशविलसितविसरमयि जननि ! पाहि

---

तृतीयम् ।

गानं—६. सावेरी. आदितालः.

प. देवि ! पावने ! सेवे चरणे ते बुधावने

अ. भावुकदायिकटाक्षविलासिनि !
भारति ! देहि सदा कुशलं भुवनेश्वरि ! देवि !

च. (१) सोमबिम्बमदहरसुमुखि ! भक्तजनाखिल-
कामितदाननिरते ! कान्तकुन्ददन्ति !

भीमानन्ताज्ञानतिमिरभेदनमिहिरायिते !
मामकहृदि विहर मान्यगुणावासे !
सामजपुङ्गवचारुगते ! सुर-
साध्यनुते ! विमले ! वरदे ! भुवनेश्वरि ! देवि !

च. (२) वारिदनिभचिकुरे ! वासवोपलनयने !
मारशरासनरुचिचोरचिल्लिकान्ते !
सारसकृतनिलये ! जाम्बूनदमयभूषे !
नारदादिमुनिनुतनामसमुदाये !
भूरिमनोज्ञकराञ्चितवीणा-
पुस्तकभासिनि ! चारुहसे ! भुवनेश्वरि ! देवि

(३) पातितदितिसुते ! श्रीपद्मनाभविलासिनि !
वीतपापजनगेयविभवे ! विद्यारूपे !
चातको जलदमिव सादरमाश्रयामि त्वां
प्रीतिं मयि कुरु लोकमातरयि नित्यं
धूतमलं कुरु मां सदये ! परि-
पोषितसूरिगुणे ! शुभदे ! भुवनेश्वरि ! देवि.

---

चतुर्थम् ।

गानं— ७. तोटि. आदितालः.

प. भारति ! मामव कृपया नतजनार्त्ति-
भारहरणनिरतया

अ. शारदविधुमण्डलसदृशमनोहरमुखि ! भारति !

च. (१) वासवादिसुरविनुते ! तरणिशत-
भासुरभूषणलसिते !
हासजितकुन्दवितते ! विमलमुक्ता-
हारकण्ठि ! गजेन्द्रगते !

---

१. 'नवि', २. 'तो', ३. 'गा', ४. 'न' क. ख. पाठः.



दासभूतजनविद्यादानलोले ! परदेवि !
भासुरचन्दनमृगमदकुसुमसु-
वासितगात्रि ! सुपावनशीले ! भारति !

च. (२) नारदादिमनोनिलये ! भुवनत्रय-
नायिके ! कृताज्ञानिलये !
चारुबाहुधृतवलये ! विकच-
सारसाक्षि ! तोषितभूवलये !
मारकार्मुकसुषमाचोरचिल्लियुगे ! वाणि !
वारिजभवदयिते ! वरवीणा-
वादनलोलकराङ्गुलिजाले ! भारति !

(३) सकलागममयरूपे ! निखिललोक-
जननि ! सुधामधुरालापे !
अकळङ्कगुणकलापे ! करुणारस-
हृतविवशजनविलापे !
सकले ! पद्मनाभपदसरसिजसेवकवर-
शुकसनकादिमुनीश्वरविनुते !
सोमकलासदृशामलभाले ! भारति !

---

पञ्चमम् ।

गानं— ८. भैरवी. त्रिपुटा.

प. जननि ! मामवामेये ! भारति ! जय
सरसिजासनजाये !

अ. अनुपमितकमलावासे ! चारु-
हसितकृतकुन्दनिरासे ! देवि !
मुनिवरेडितविमलचरिते !
मोहनीयगुणौघभरिते ! जननि !

---

१ 'न' मुद्रितपाठः. २ 'परे ! शु', ३. 'ल' क. ख. पाठः.

च. (१) तरुणवारिदनिभवेणि[1] ! देवे[2]-
तरुकिसलयोपमपाणि-
कलितवरदाभीतिमुद्रे ! कल्याणि ! पूर्ण-
शरदिन्दुसमकान्ते ! वाणि !
सुरुचिरनयनजितैणि ! परम-
करुणारसशिशिरवेणि[3] !
चरणगतजनभरणनिपुणे !
परमामृतसुमधुरभाषिणि[4] ! जननि !

(२) घनसारतिलकाङ्कितभाले ! अति-
कमनीयविशददुकूले ! विनत-
जनविद्यावितरणलोले ! साधु-
स्मरणीयतमपादमूले !
कनकभूषणे ! शुभशीले ! सर्वा-
गममयि ! सुजनानुकूले !
नानामुनिमनोमयवनजनिलये !
विनिहताश्रितविविधशमले ! जननि !

(३) परिहृतघनाज्ञानखेदे ! कृत-
पद्मनाभसेवकमोदे !
सततपरिचितवीणानिनादे ! मम
कुरु मतिमयि तव पादे
सुरगणमहितविनोदे ! शीत-
करपोतधरे ! गतभेदे !
सदा सरसीरुहमुखि ! सपदि वदने
सरसमिह वस सकलवरदे[5] ! जननि !

——

१. 'णि', २. 'वि' मुद्रितपाठः. ३. 'णि ! देवि ! च', ४. 'रसुभा' क. ख. पाठः. ५. 'श' मुद्रितपाठः.



षष्ठम् ।

गानं—९. पन्तुवराळी. चेम्पट.

प. सरोरुहासनजाये ! भवति ! समोदमम्ब ! नमामि

अ. पुरन्दरादिसुरोत्तमसुरुचिर-
किरीटमणिकिरणाञ्चितचरणे ! सरोरुहा

च. (१) यामिनीशमनोज्ञतमरुचिभूममदविनिवारणपटुसित-
तामरसमृदुकोटरवासिनि !
सामजराजसदृशगमने !
काममञ्जुशरासननिरुपम-
कान्तिहरचिलिचलननिहत[1]-
भीमनिबिडाज्ञानमले !
सुललामशोभिभालतले ! वर-
हेमचारुभूषणलसिते !
मदहीनमौनिहृदयैकपदे ! सुर-
भामिनीनिवहगीतगुणे ! शशि-
धाममन्दहसिते ! जय भगवति ! सरोरुहा

(२) मङ्गळारवशालिवीणासङ्गिकरमृदुळाङ्गुलिद[2]ळजित-
तुङ्गकल्पककिसलयनिवहे ! दूरितसेवकतापभरे !
भृङ्गसञ्चयवलयितसुमसुरभीकृत[3]धाम्मिलरुचित[4]मद-
भङ्गसजलाम्भोदकुले ! नवपङ्कजोपमनयनयुगे !
लसदङ्गरागघनसारहरिणमद-
हारभासिकुचकुम्भयुगे ! हरि-
पुङ्गवोपमितमध्यतले, परबोधरूपिणि ! परे !
जगदीश्वरि ! सरोरुहा

१. 'वि' क. ख. पाठः. २. 'सि', ३. 'चयभीकलित' मुद्रितपाठः. ४. 'रुचिततिम' क. ख. पाठः.

च. (३) बालचन्द्रवतंसिनि! परिजन-
पालनैकपरे! घनपातक-
शैलभिदुरायितचरिते!
करुणालवालायितहृदये!
लोलरुचिराळकपरिवृतसुवि-
शालनिटिलायितवदने!
नालमिह फणिनायकोऽपि वतां-
लपितुमयि महिमानं ते
तूलतां नय ममोद्यदविद्या-
जालमाशु ननु भारति! सकलं
भाललोचनमुखाखिलवन्दितप-
द्मनाभपदसेवकनिरते! — सरोरुहा

---

सप्तमम् ।

गानं—१०. शुद्धसावेरि. अटन्त. (त्रिपुट).

प. जननि! पाहि सदा जगदीशे! देवि!
स्मरहरवल्लभे!

अ. अनवद्यतरनवहारालङ्कृते! मञ्जु-
वनजायतलोचने! वाहिनीतटवासे! — जननि!

च. (१) शैलराजतनये! चण्डमुण्डनाशिनि!
शूलशोभितकरे! सुन्दररूपे!
भालराजितिलके! परमकृपावति!
पालितसुजनमालिके! सुर-
सालकिसलयचारुनिजपादे! — जननि!

---

१. 'लरुचिनिलयायि' मुद्रितपाठः. २. 'न विधुमुखि! माहिमानं ते तुलयितुं नियमोद्यतवि' क. ख. पाठः. ३. 'कसे' ख. पाठः. ४. 'ण्डार्दिनि!' क. ख. पाठः.



च. (२) महितबाहुबलमहिषासुरादि-
गहनदहनायिते! गतमदसेव्ये!
सुहसितजितकुन्दे! शोणजपाधरि!
विहर मम हृदि विधुसदृशमुखि!
बहळमलयजबन्धुरे! लोक- — जननि!

(३) परमपावनश्रीपद्मनाभसहोदरि!
नीलचिकुरे! केसरिवरवाहे!
चरितदूरितभक्तदरनिकरे! गौरि!
कुरु कृपां मयि कुलिशधरमुखपरिणुते!
घनदुरितहृतिलोले! — जननि!

---

अष्टमम् ।

गानं—११. नाट्टक्कुरुञ्चि. अटताळः.

प. पाहि जननि! सन्ततं मामिहामलपरिणत-
विधुवदने!

अ. देवि! सकलशुभदे! हिमाचलकन्ये!
साहसिकदारुणचण्डमुण्डनाशिनि! — पाहि

च. (१) बालसोमधारिणि! परमकृपावति!
नीलवारिदनिभनेत्रे! रुचिरशीले!
भाललसितवरपाटीरतिलके! श्री-
नीलकण्ठदयिते! निगमवनमातङ्गि! — पाहि

(२) सुरभिकुसुमराजिशोभितकचबृन्दे!
वरदे! वासवमुखवन्द्यमानचरणे!
अरुणजपाकुसुमाधरे! कौमुदी-
परमोज्ज्वलहसिते! भक्तकल्पवल्लिके! — पाहि

---

१. द्विजकु'. २. 'रालोके! ज' क. ख. पाठः. ३. 'न' मुद्रितपाठः.

च. (३) कमनीयतम[1]रूपे ! कन्याकुब्जवासिनि !
शमितपापनिकरे ! शान्तहृदयगेहे !
अमितविमलरु[2]चिहारे ! नील-
वारिदोपमवे[3]णि ! श्रीपद्मनाभसोदरि ! पाहि

---

नवमम् ।

गानं—१२. आरभी. आदिताळः.

प. पाहि पर्वतनन्दिनि ! मामयि
पार्वणेन्दुसमवदने !

अ. वाहिनीतटनिवासिनि ! केसरि-
वाहने ! दितिजाळिविदारणे ! पाहि

च. (१) जम्भवैरिमुख[2]नते ! करि-
कुम्भपीवरकुचविनते ! वर-
शम्भुललाटविलोचनपावक-
सम्भवे ! समधिकगुणवसते ! पाहि

(२) कञ्जदळनिभलोचने ! मधु-
मञ्जुतरमृदुभाषणे ! मद-
कुञ्जरनायकमृदुगतिमञ्जिम-
भञ्जनातिचणमन्थरगमने ! पाहि

(३) चञ्चदळिलाळिताळके ! तिल-
का[4]ञ्चितशशिकलाळिके ! नत-
वञ्चिनृपालकवंशशुभोदय-
सञ्चयैकक्कृतिसततगुणनिके ! पाहि

---

१. 'र', २. 'मुखहा', ३. 'णि ! गौरि ! श्री', ४. 'खा' क. ख. पाठः.
५. 'शधरक' मुद्रितपाठः.



(४. विष्णुकीर्तनानि ।)

(क) विष्णुसामान्यकीर्तनानि ।

गानं—१३. परशु. चाप्‌ु[1].

प. पन्नगशयन ! पाहि मां

च. (१) पन्नगशयन ! पापविमोचन !
खिन्नतानाशन ! केशिनिषूदन ! पन्नग

(२) कञ्जविलोचन ! कालियदमन !
कुञ्जरगमन ! कोमळवदन ! पन्नग

(३) अण्डजवाहन ! आश्रितपालन !
पाण्डवरञ्जन ! पौण्ड्रकभञ्जन ! पन्नग

(४) देवकीनन्दन ! दैत्यनिषूदन !
पावनचरण ! पालितभुवन ! पन्नग

(५) गोरसचोरक ! गोपिकानायक !
वारिदमेचक ! वारणपालक ! पन्नग

(६) पञ्चजनान्तक ! पादसंसेवक-
वञ्चिभूपालकवाञ्छितदायक ! पन्नग

---

गानं—१४. घण्ट. चेम्पट.

(१) कमलनयन ! जगदीश्वर ! कमला-
कामुक ! मां परिपाहि विभो !

(२) चामीकरघनगर्वहरणचण-
चारुवसन ! परिपाहि विभो !

(३) सामजपरिवृढतापसुशमन ! जल-
जासनै[3]नुत ! परिपाहि विभो !

---

१. 'आदिः', २. 'पश', ३. 'नकृतनमन ! प' क. पाठः.

(४) विहगवरगमन! देव! निगमतति-
वेद्यचरित! परिपाहि विभो!

(५) दनुजकुलमथन! दीनशरण! भव-
तारकपद! परिपाहि विभो!

(६) गिरिवरधर! फणिवर्यशयन! सुर-
खेदशमन! परिपाहि विभो!

(७) जलधरनिभकाय! रुचिरेन्दिराङ्कविलसित-
चरणजलज! परिपाहि विभो!

(८) मदनजनक! मणिपटलखचितवर-
मकुटलसित! परिपाहि विभो!

(९) नतजनभयहर! विधुमुख! श्री-
पद्मनाभ! मुदा परिपाहि विभो!

---

गानं—१५. पन्तुवराळी. चेम्पट.

प. परिपालय सरसीरुहलोचन!
भवभयकाननभञ्जन!

च. (१) भानुशर्वरीनाथनेत्रयुग!
पन्नगारिवरवाहन! परि

(२) पादनम्रजनकल्पसाल! नव-
पङ्कजातसदृशानन! परि

(३) गोपवामनयनाकुचमर्दन!
घोरदैत्यकुलनाशन! परि

(४) नीरदाळिघनमेचकाङ्ग!
नीलकण्ठनुत! मोहन! परि

(५) दीनलोकपरिपालक! मुरहर!
दिवसनाथकुलशोभन! परि

---

१. 'नयनवर! प', २. 'भघननी' क. पाठः.



च. (६) कमलारसाननाब्जमधुप!
दरकण्ठ! शार्ङ्गशरासन! परि

(७) श्रीपद्मनाभ! निखिलदेव-
मुनिसेव्य! दिव्यगुणभाजन! परि

---

गानं—१६. तोटि. अटन्त.

प. सरसिजनाभ! मुरारे! पाहि सततं
शमलाद्रिकुलिश! शौरे!

अ. दरचक्रगदाम्बुजधर! भूमीरमाकान्त!
सरिदीशकृतावास! समुदितपरितोष! सरसिज

च. (१) सुरमुनिभयहर! शोणपल्लवाधर!
परमकृपारसपरिपूर्णतरापाङ्ग!
सुरवारिदसमीर! मोहनमणिभूष!
हरिहयमुखविबुधानतपदयुग! सरसिज

(२) कनकोपमितचेल! कौरवाकुलपाण्डु-
तनयतापमोचन! ताराधिपवदन!
मनसिजजनक! श्रीमधुवनकृतखेल!
वनजारुणचरण! वासुदेव! देवेश! सरसिज

(३) कमनीयतररूप! कल्याणगुणपूर्ण!
समरागतदानवसमुदायाहिखगेन्द्र!
गमपार्टवनिर्जितगन्धसामजराज!
विमलकुन्दरदन! वेदान्तागमवेद्य! सरसिज

---

गानं—१७. केदारगौळम्. अटन्त.

प. जलजनाभ! मामव श्रीनायक!

अ. जलदमेचकदेह! जातरूपभूषण!
सलिलनिधिशयन! सरसिजदळनेत्र! जलज

---

१ 'कलक' मुद्रितपाठः. २. 'गैसुश', ३. 'त्रिपुटा.'. ४. 'ह',
५. 'य विहगे', ६. 'दविनि' क. पाठः.

च. (१) धरणीभरसुरादिदनुजकुलनिधन!
परिधृतमनुजरूपामलमूर्त्ते!
दरतुल्यमनोज्ञकन्धर! दीनबन्धो!
करुणालय! मे देव! कलय कुशलमयि जलज

(२) असिताळकावृततरास्यशीताकिरण!
हसितनिन्दितमुक्ताहार! देवेश!
लसितपीतवसन! लम्बवन्यमालिक!
वस मम हृदि नित्यं वारिजासनसेव्य! जलज

(३) मकरकुण्डलकान्तिमण्डितसुकपोल!
शुकनारदादिसंस्तुतगुणजाल!
विकटतरसंसारविपिनदळनशौण्ड!
सकललोकनायक! सामजाधिपपाल! जलज

---

गानं—१८. नाट्टक्कुरुञ्चि. चेम्पट.

प. जगदीश! सदा मामव पावनचरित! देवदेव!

अ. खगवाहन! सुरशोकविभञ्जन! कञ्जनाभ!
तनुनिन्दितमनसिज!
विगतशमलमुनिमानसनिवसन!
वेदवेद्य! कमलाधृतपदयुग! जगदीश!

च. (१) सुररिपुनिचयपयोदसमीर!
सुन्दरतनुरुचिनिन्दितमार!
चरणनतसकलतापविदार!
चारुमृदुवचन! मौक्तिकहार!
भरितकरुणनयनान्त! महेश्वर-
भारतीशनुतदिव्यगुणालय! जगदीश!

१. 'भा' क. पाठः. २. 'दितद', ३. 'चारुवामनमूर्त्ते' मुद्रितपाठः.



च. (२) कलिततटिदुपममोहनचेल!
कम्बुकण्ठ! तुलसीनवमाल!
जलजसमनयन! मङ्गळलील!
साधुलोकशरणोद्धृतशैल!
सलिलराशिशयनाम्बुजकोमळ-
चरणहतशकटदानव! निरुपम! जगदीश

(३) वदनपरिहसितपार्वणसोम!
वासुदेव! रणपातितभौम!
हृदि मम परिलस सम्भृतकाम!
हेममकुट! यदुवीरललाम!
मदनजनक! वरकौस्तुभविलसित!
मान्यशील! मधुसूदन! जय जय जगदीश

---

गानं—१९. तोटि. चेम्पट.

प. सामोदं कलयामि सरसिजनाभं

अ. भूमिभारहरणं भोगीश्वरशयनं सामोदं

च. (१) रदनजितमौक्तिकं राधाजीवनायकं
मदनजनकमृजुमतिमानसनिलयं
विदलितमधुमुखवैरिदानवकुलं
सदयपोषितगोपजालं सुशीलं सामोदं

(२) दुरितहरचरितं तोषितकुचेलं श्री-
चरणविनतपालं चामीकरवसनं
हरिहयमदहरमम्बुराशिगम्भीरं
तरुणजलजनिभनेत्रं पवित्रं सामोदं

(३) सुमसुरभिलकेशं यमुनाकेलिलोलुभं[२]
कमनीयतरवेणुगानपरायणं

१. 'ळस्वच', २. 'पं' क. पाठः.

शमितकालियदर्पं शान्ततापसगेयं
दमितसूनविशिखभासं सुहासं सामोदं

गानं—२०. कल्याणी. अटन्त.

प. परिपाहि मामयि परमपुरुष ! पद्मनाभ !
मुरारे !

अ. शरणागतधरणीसङ्कटभयहर !
मरकतमुखरत्नमकरकुण्डलकर्ण ! परि

च. (१) पूरितसुरजनकामित ! परि-
पूर्णविधुमुखविराजित !
नारदादिमुनीन्द्रसेवित ! विनि-
वारितभयवारणाधिपसन्नुत !
वारिधरनिभदेह[1] ! नुतिपर-
वागधिप ! भवमोहनिरुपम-
भूरितिमिरसमूहदिनकर !
भोगिशय ! खगवाह ! जय जय परि

(२) कालयवनादिकभीषण ! देव !
कौस्तुभमणिवरभूषण !
श्रीललनापरितोषण ! सम-
चेतोहरणचणमञ्जुतरभाषण !
भाललसितललाम ! सरसिज-
पाद ! तनुजितकाम ! परिजन-
जालदुरितविराम ! सुविदित-
शौर्यमुखगुणसीम ! जय जय परि

(३) सेवकजनाभीष्टदायक ! नाथ !
चिन्‍ ! धृतशार्ङ्गसायक !

१. 'हरु वि ?चे) नु' क. पाठः.



पावनतर ! लोकनायक ! वैरि-
पन्नगसमवायमर्दनविनायक !
भावुककलनलोल ! सुविशद-
भाव ! बुधजनपाल[1] ! निजजन-
तावनविधृतशैल ! सुरभिल-
तरणिजातटखेल ! जय जय परि

गानं—२१. देवगान्धारं[2]. चेम्पट.

प. पाहि मामयि मुकुन्द ! कोमलपङ्कजोपमनयन !
वारिददेह ! केशव[3] ! नौमि ते पादं

अ. आहवाहतदानवामल-
हार ! लीलामानवाधिक-
मोहनीयहरिचन्दनरूषित-
मूर्ते ! सकलभुवननायक ! पाहि

च. (१) कुन्दसमरद ! सुरेशसुम-
वृन्दविराजितकेशामित-
नन्दनीयभव्यसुगुण ! शुक-
भृगुनारदादिसेव्य !
मन्दयानजितमत्तमातङ्ग !
महितयोगिजनभृङ्गकुलाम्बुज !
मन्दराद्रिधर ! तामरसासन-
महादेवनुत[4] ! भक्तवत्सल ! पाहि

(२) सोमसमानन ! शौरे ! बल-
सोदर ! वरद ! मुरारे ! वन-
दामशोभिकण्ठ ! दीनशरण !
धरणीभारहरण !

१. 'पालन' मुद्रितपाठः. २. 'आदिः', ३. 'न', ४. 'वनितु' क. पाठः.

कामिनीनिवहनयनसुमाशुग !
खलधरातनयभेकमहोरग !
यामिनीशरविनेत्रयुगाव्यय !
यदूत्तंस ! कनकवसनलसित ! पाहि

च. (३) भासुरमृगमदभालाखिल-
पालनपर ! गोपाल ! निज-
दाससङ्कल्पसाल !
निरुपमधैर्यसलिलराशे !
वासवाधिहर ! दिव्यमकुटधर !
वचनविजितसुध ! बिम्बफलाधर !
रासकेलिपरितोषितनिजजन !
रमाकान्त ! जलजनाभ ! पर पाहि

---

गानं २२. कल्याणी. चेम्पट.

प. पङ्कजलोचन ! पाहि मुरान्तक !
पङ्कजालयाजीवनाथ! विभो !

अ. शङ्करविधिवलशासननुतगुण !
शं कुरु सततं मे सारसनाभ ! शौरे ! पङ्कज

च. (१) त्रिभुवनघातुकं दितिजं कनककशिपुमभि-
भूय नखैरैर्विदार्य बलाद् रभसेन निज-
पदराजीवनतमेतत्प्रभवं
श्रीनरसिंह ! प्रह्लादं पालितवान् पङ्कज

(२) पितृवचसा समुपेत्य विपिनभुव-
मतिरूपगुणामात्मधर्मपत्नीं
हृतवन्तं दशकण्ठमिषुणैकेन निहत्य
प्रतिगृह्यैनां साकेतं प्राप्त ! श्रीरघुवीर ! पङ्कज

१. 'ज' मुद्रितपाठः. २. 'आदिः', ३. 'दा' क. पाठः.



च. (३) सुन्दरतररूप ! नन्दिताभीरनारी-
वृन्दमुखसरसीरुहमधुप !
वृन्दावनान्तकृतविविधसुखविहार !
कुन्दनिभरद ! गोविन्द ! नन्दनन्दन ! पङ्कज

---

गानं—२३. चेञ्चोट्टि. चेम्पट.

प. कलये श्रीकमलनयनचरणे

अ. कलये कमलासनादिसकलविबुधशरणे कलये

च. (१) भवभयभरहरणे भासुररुचिभरणे
भजनशीलजनमनोभिलषितवरवितरणे कलये

(२) सरसिजमदहरणे साधुमनोविहरणे
सकललोकदुरिताशिगिरिकुलिशप्रहरणे कलये

(३) जगदुरुसुखकरणे जातविपिनचरणे
जलजनाभचरणदासविपुलकुशलकरणे कलये

---

गानं—२४. तोटि. अटन्त.

प. देवदेव मां पालय सुमहानुभाव ! दीनबन्धो !

अ. पावनतम ! हतपापानिजपद
सेवकशुभकर ! श्रीमन्नादिकेशव ! देव

च. (१) कुण्डलीन्द्रशयन ! कुरुविन्दोपमरद !
चण्डकेशिमथन ! सरसिजसुनयन !
अण्डजरथ ! मणिहारसुखविमल-
मण्डनधर ! कोटिमारसदृशाकार ! देव

(२) वासवानुज ! मृदुवचनतोषिताशेष !
भासिततटिदाभपरमवसन ! चारु-
हासनिन्दितकुन्द ! हरिमणिनिभ ! कम-
लासनमदहर ! लसितवन्यमालिक ! देव

१. 'परिह', २. 'त्रिपुटा', ३. 'करप', ४. 'न्दनिभरा', ५. 'मुक्त !
हु' क. पाठः.

च. (३) नारदादिमुनीन्द्रनतपादयुग ! विनि-
वारितदनुभव ! वारणेन्द्रगमन !
भूरिविवशजनघोरतापमोचन !
वारणभयहर ! वनजनाभ ! माधव ! देव

---

गानं—२५. भैरवि. झम्प.

प. भो चिन्तयामि ते पदनीररुहं
निर्जितदेवानोकहपल्लवं

अ. अन्तकारिकमलासनसेवित !
हरे ! रमानायक ! जगदीश्वर ! भो चिन्तयामि

च. (१) कामजनक ! चराचरलोककारणकाय ! तमाल-
श्यामशोभ ! जितेन्द्रियतमवर ! सात्वतगेय !
[सुरार्तिवि-
राम ! देवानन्यशरणजनराजिसहाय ! जगन्नुत !
रामणीयकावास ! वरसुजनस्तोमविधेय ! धरेश !
भूमीघनतरभारनिवारण !
पूतचरित ! परिपालितवारण !
भीमागाधभवाम्बुधितारण !
भीषणपटुविमतौघविदारण ! भो चिन्तयामि

(२) शारदाम्बुजनेत्र ! भुजङ्गमवैरिसुवाह ! नितान्त-
धीर ! वृन्दावनपरिपोषितधेनुसमूह ! पवित्र-
शूरकुल ! वरचन्दनरूषितसुन्दरदेह ! मुकुन्द !
हीरमुखमणिभूषण ! निरुपमचारिमबाह ! यदूत्तम !
घोरामर्षितभौमकृताहव !
भूरिकृपारसपूर्णतरार्णव !
हारालङ्कृत ! दुरितवनीदव !
हाटकाभवसनावृत ! माधव ! भो चिन्तयामि

१. 'आदिः', २. 'भरदरवा' क. पाठः.



4055

च. (३) रीणसुकृतजनातिदुराप ! सुरेश्वरधृतिद ! मनोहर !
पाणिविराजितचक्रगदादरपङ्कज ! वरद ! सुमधुर-
वेणुगानपरायण ! सितकुरुविन्दनिभरद ! जपासुम-
शोणिमाधर ! केशवे[1]निन्दितसुरुचिरवनद ! मनोज्ञ-
वाणीजितं[2]वरमधुरसुधारस !
वासुदेव ! सम्मोहन ! दरहस !
बाणासुरभुजखण्डन ! शुभरस !
पद्मनाभ ! मुखविहसितसारस ! भो चिन्तयामि

---

गानं—२६. सुरुटी. अटन्त.[3]

प. तावकपदाम्बुजभजनमेवाखिल-
तापशमनमिति मन्ये

अ. केवलानन्दस्वरूप ! सनकमुख-
गीतगुण ! जलदाभ ! श्रीपद्मनाभ ! तावक

च. (१) द्रुपदनृपात्मजा दुश्शासनेन पूर्व-
मपहृताम्बरा विवशा
सपदि चिन्तयन्ती त्वां संवृता त्वया चेलै-
रपरिमितैर्विविधैः करुणाजलधे ! तावक

(२) परमभागवतो हि प्रह्लादोऽपि तातेन
परमुपद्रुतो देवेश ! चरणपङ्कजे तव
चिरं निविष्टमानसो
न रुजां किञ्चिदवाप मङ्गळरूप ! तावक

(३) श्रीकराधनोऽपि कुचेलाख्यमहीसुरो
लोकनाथ ! पृथुकं
ते किमपि वितीर्य नाकेश्वरवदासी-
दिह चिन्मय ! शौरे ! देव ! मुरारे ! तावक

१. 'व ! नीन्दतसुरुचिरवदन ! म', २. तम', ३. 'त्रिपुटा' क. पाठः.

गानं—२७ दर्बार्. झम्पट.

प. पालय सदा मामयि माधव ! पङ्कजातकोमळनयन !

अ. नीलाम्भोधरमेचकतर ! विधि-
नीलकण्ठनुत ! दासजनामर-
सालकल्प ! श्रीपद्मनाभ !
शौरे ! जगदीश ! मुरारे ! पालय

सा रि स नि स रो गा मे[2] प धा नी

च. (१) सारसरसरागाभयहानि-
धा प धा प धम प धानी सानी
दापदान ! समसुधानीकाश !
री स गा रि सा रि नी धपरिसास
वेणुगानलोल ! वैरिपरित्रास !
सापधमपगारिस
साधुतमकृपारस ! पालय

(२) वारणवरतापशमनचणदय !
वारिराशिकल्पितनिजशयन !
मारकोटिसुन्दर ! मुनिहृदयवि-
हार ! नागरिपुवाहन ! पालय

(३) भूरिमुदितवृन्दारक ! हाटकचेल !
श्रीलोल ! गोपाल ! चारुबाल-
चन्द्रभाल ! नववनमाल !
सुजनावनशील ! पालय

---

(ख) विष्णुपरमध्यमकालकीर्त्तनानि ।

गानं—२८. कामोदरी. झम्पट.

प. चारुपङ्कजमृदुतरनिजपद ! साधुजना-
वनलोलुप ! सात्वतवर ! मामव

---

१. 'आदिः', २. 'मा पा ध नी' क. पाठः. ३. 'क' मुद्रितपाठः.



अ. हीरादिमणियुतहेमदिव्यमकुटादिविराजित !
मानिनीनिवहमानसमोहन ! चारु

च. (१) पापहर ! मुनिमतिमणितलिमग ! माधव !
वारिदनिभ ! खलभौममर्दन !
सुमुदितबुधमहित !
रूपनिन्दितसुमशर ! रुचिरक-
लापधर ! निरुपमगुण ! यदुकुल-
दीप ! विदलितपदनतजनभव-
तापसमुदय ! गिरिधर ! मुरहर ! चारु

(२) वारणाधिपमदहरपटिमग-
माखिलनायक ! पन्नगवैरि-
वाहन ! कनकलसितवसन !
भारतीशनिषेवित ! सुविमल-
हारशोभितकन्धर ! रणमुख-
शूर ! मधुवनकलितनिरुपमवि-
हार ! हिमकरसमरुचिसुवदन ! चारु

(३) वामकरतलभुवि सुमसममग-
मावहतो वपुरयि तव
वासवानतपदसरसिजयुगल !
मामके हृदि विलसतु जगदभि-
राम ! सुललितमृगमदकलितल-
लाम ! पशुकुलपशुपभयभरवि-
राम ! पङ्कजनाभ ! दयाकर ! चारु

---

गानं—२९. शङ्कराभरणं. चेम्पट.

प. सारसभवसेवितपदयुगलामल-
हिमकरसुवदन ! सरसिजनाभ ! मामव

अ. पारिजातकुसुमपरिमलितचिकुर !
निरुपमगुणगणसागर !
पातकसञ्चयभेदन ! सारस

च. (१) चारुयामुनसैकतविहरण !
शान्ततापसकलित ! मृदुहसित !
मारसुन्दर ! दितिसुतजलधर-
मारुताम्बुधिसम ! भुवनेश्वर ! सारस

(२) गोपधेनुकुलावन ! कबलित-
घोरदावदहनामितविक्रम !
कोपविनिहतपूतन ! गिरिधर !
घोषकमलदिवाकर ! यदुवर ! सारस

(३) नीरजायतलोचनयुग ! धर-
णीरमारमणातिमनोहर !
सारकनकमदापहसुवसन !
शङ्करभरणालघुनिजभुज ! सारस

---

गानं — ३० पन्तुवराळी. चेम्पट.

प. सारसाक्ष ! परिपालय मामयि
सन्ततं करुणया जगदीश !

अ. नीरजाञ्जनकाधिकमेचक !
नीरदाभ ! करिनायकभयहर ! सार

च. (१) पादपातिसमदेवनिकाय ! हरे !
शिशुसोममनोहर !
भालदेशविलसितमृगमदतिलक !
सूदितारिगण ! निरुपमबल ! बल-
सोदराङ्गपरिचर्चितचन्दन ! सार

(२) भोगिभोगकलितामनिवास ! विभो !
विहगेश्वरवाहन !

---

१. 'द' घ. पाठः. २. 'लवि' मुद्रितपाठः.



पूर्णकाम ! कलिदोषविनाशकर !
योगिजातहृदयाम्बुजखेलन !
सागराधिकगभीर ! मुरान्तक ! सार

(३) भीमसेव्यतम ! मङ्गळलील ! मुदा
कुरु मे कुशलं भव-
भीतिनाशनचणाद्भुतगुणनिलय !
भामिनीसमुदयाशयमोहन !
पद्मनाभ ! कमलाधरणीवर ! सार

---

गानं— ३१. आहिरि. चेम्पट.

प. पन्नगेन्द्रशय ! निरुपमगुण ! वसुधा-
कमलावर ! पालय
भानुसोमनयनाम्बुजनाभ ! हरे !

अ. किन्नरीनिवहगीत ! सुपावन-
कीर्त्तिपूर ! मधुसूदन ! सुरवर-
सन्नताङ्घ्रियुग ! विकसितशरदिज-
सारसानन ! जगत्त्रयनायक ! पन्न

च. (१) मौनिलोकहृदयाम्बुजविहितनिवास !
कुरुविन्दरदाखिल-
माननीय ! समशोकविनाशकहास !
शरणागतपोषण !
दानवारणमनोहरतरनिजयान !
दीनपरिपालक ! कल्पक-
सूनजातभृशवासितकचभर !
सूरिभीतितिमिरौघदिनेश्वर ! पन्न

(२) नन्दकायुध ! निवारितसुररिपुजाल !
पुरुषोत्तम ! शुकभृगु-

---

१. 'य ! शो' मुद्रितपाठः.

नारदादिपरिणुतबहुविधशुभलील !
कमलासनमदहर !
मन्दरोद्धरणचण ! मृदुभाषण !
नन्दगोपतनयामितविक्रम !
नन्दनीयतम ! महितविमलनिज-
नामधेय ! करुणालय ! जयजय पन्न

(३) चारुबिम्बफलरुचिरतराधर ! शौरे !
पदपातिजनामर-
साल ! नीलजलदोपमशोभ ! मुरारे !
विहगाधिपवाहन !
मारकोटिसम ! कलितलसितवन-
माल ! पीतवसनारुणकौस्तुभ-
हारकङ्कणविराजिततम ! परमा-
हरित्रिदशजनपरिचारित ! पन्न

---

गानं—३२. कल्याणी. रूपकम्.

प. सारसलोचन ! मामव भो दययामलतम !
सरसिजनाभ !

अ. नीरजशरसुन्दर ! निखिलविबुधमुनिभयहर ! सारस

च. (१) पापसमूहविभञ्जन ! पौर्विकसोमसमानन[1] !
माप ! निवारितदानव ! मान्यगुणातिमनोहर ! सारस

(२) भोगिवरेण्यनिवास ! विभो ! कमलासनपूजित !
नागभयापह ! पावननामनिकाय ! मुरान्तक ! सारस

(३) शेषपुरीश्वर ! माधव ! सेवकमङ्गलदायक !
भाषणविजितसुधारस ! पाटलबिम्बफलाधर ! सारस

---

१. 'पार्वसो' मुद्रितपाठः.



गानं—३३. दर्बार्. चेम्पट.

प. शौरे ! वितर कुशलमयि मेऽनिशं सकलजगदधीश !

अ. कारुण्यादिगुणालय ! कनकाम्बर ! सनकादिनिषेवित ! शौरे !

च. (१) पालितवारणपरिवृढ ! हिमकरभानुनयन ! रुचिरलील !
कालकालनुतानघ ! कमलावर ! शमलापहसुचरित ! शौरे !

(२) कामितदायक ! मधुहर ! तनुजितकाम ! वदनविजितसोम !
श्यामदेहरुचे ! वरसमरापतदमरान्तकविदलन ! शौरे !

(३) नारदशौनकमुखनुत ! सरसिजनाभ ! गळविलसितहार !
वारिजायतलोचन ! वसुधाभरण ! सुधामृदुलवचन ! शौरे !

---

गानं—३४. सुरुट्टि. रूपकम्.

प. सादरमव सरसिजदलसुनयन ! सकल-
सुजनभ[3]यभरहर !

अ. पादतलनतसुरमुनिसमुदय !
